# Shri Jagadisha Shatakam

# શ્રીજગદીશશતકમ્

## Document Information

Text title : Shri Jagadisha Shatakam 05 18

File name : jagadIshashatakam.itx

Category : vishhnu, krishna, shataka

Location : doc_vishhnu

Author : raghurAjasiMhajAdeva

Proofread by : Rajesh Thyagarajan

Description/comments : From stotrArNavaH 05-18

Latest update : October 9, 2021

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

June 29, 2023

*sanskritdocuments.org*

# શ્રીજગદીશશતકમ્

યદ્ભાસાનુવિભાતિ વિશ્વમખિલં સાર્કેન્દુતારાગણં
યત્કિઞ્ચિદ્ભ્રુકુટીકટાક્ષકલયા નાશોદ્ભવૌ પાલનમ્ ।
યત્પાદામ્બુજધૂલિધારણવશાત્કુર્વન્ત્ય યત્નં સુરા-
સ્તં નીલાચલવાસિનં યદુપતિં વન્દે જગદ્વન્દિતમ્ ॥ ૧॥

યં સિદ્ધા મુનયઃ સુરાસુરગણા ગન્ધર્વયક્ષોરગાઃ
સેશાનાઃ સચતુર્મુખાઃ પ્રતિદિનં ધ્યાયન્તિ શમ્પ્રાપ્તયે ।
વિજ્ઞાનેન વિરાગયોગતપસા જાનન્તિ કિઞ્ચિત્પદં
તં નીલાચલવાસિનં યદુપતિં વન્દે જગદ્વન્દિતમ્ ॥ ૨॥

યઃ પૂર્વં જગતામનાદિરમલોઽનન્તઃ પરો મધ્યગઃ
સ્રષ્ટા ગોપયિતા કટાક્ષકલયા હન્તા નિયન્તા વિભુઃ ।
યો ધાતા ધ્રુવધર્મધારકનૃણાં શશ્વદ્વિહર્તા સ્વદૃક્
તં નીલાચલવાસિનં યદુપતિં વન્દે જગદ્વન્દિતમ્ ॥ ૩॥

યઃ સ્વામી ભુવનસ્ય ગં મુનિગણા ધ્યાયન્તિ યેનાવિતા
યસ્મૈ દેવગણા હરન્તિ સુબલિં યસ્માજ્જગજ્જાયતે ।
યસ્યાભાપરિપૂરિતં જગદિદં યસ્મિંશ્ચ તલ્લીયતે
તં નીલાચલવાસિનં યદુપતિં વન્દે જગદ્વન્દિતમ્ ॥ ૪॥

યન્માયાપરિમોહિતાઃ સુરગણા ગન્ધર્વવિદ્યાધરા
યોગીશા ઋષયોઽસુરાશ્ચ પુરુષા યે સ્થાવરા જઙ્ગમાઃ ।
જાયન્તે પરિતો ભ્રમન્તિ જગતિ દ્વન્દ્વે મ્રિયન્તે સદા
તં નીલાચલવાસિનં યદુપતિં વન્દે જગદ્વન્દિતમ્ ॥ ૫॥

સાક્ષી સર્વગતઃ પ્રભુઃ પ્રકૃતયઃ સર્વેશ્વરેશઃ સુધીઃ
દિવ્યૈર્મઙ્ગલમૂર્તિમદ્ગુણગણૈઃ સંસેવિતોઽજસ્તુ યઃ ।
વેદૈશ્ચોપનિષદ્ભિરીરિતયશાઃ સચ્ચિદ્ઘનાનન્દક-
સ્તં નીલાચલવાસિનં યદુપતિં વન્દે જગદ્વન્દિતમ્ ॥ ૬॥

યઃ પાતાલપદો મહી કટિતટઃ સ્વર્લોકશીર્ષોઽસ્તુ યઃ
માર્તાણ્ડેક્ષણદિક્શ્રુતિશ્રુતિમુખો ગીર્વાણવાહાઙ્ઘ્રિઃ ।
માયાક્રીડનકો જગદ્વપુરજો હીનોહ્યદિવ્યૈર્ગુણૈ
સ્તં નીલાચલવાસિનં યદુપતિ વન્દે જગદ્વન્દિતમ્ ॥ ૭॥

યચ્છક્ત્યા હરતે હરો વિધિરપિ સ્રષ્ટા ચ શાસ્તા યમો
વહ્નિર્દાહયતે શશી સુખયતે વાયુઃ પ્રવાત્યઞ્જસા ।
missing line in the manuscript
તં નીલાચલવાસિનં યદુપતિં વન્દે જગદ્વન્દિતમ્ ॥ ૮॥

યત્પાદપઙ્કજપરાગવિમિશ્રતોયં
બ્રહ્માણ્ડમણ્ડલમખણ્ડલમાવિરિઞ્ચમ્ ।
સ્તમ્બાન્તમાશુ હિ પુનાતિ ન ભેદભાવં
વન્દે પ્રભું પતિતપાવનનામધેયમ્ ॥ ૯॥

યત્પાદપઙ્કજજલં ચતુરાનનોઽસૌ
શુદ્ધે કમણ્ડલુમુખે સુતરાં દધાર ।
અદ્યાપિ મૂર્ધનિ શિવો વહતીષ્ટરૂપં
વન્દે પ્રભું પતિતપાવનનામધેયમ્ ॥ ૧૦॥

યત્પાદતીર્થમમલં પરમાદરેણ
સપ્તર્ષયઃ પ્રતિદિનં શિરસા વહન્તિ ।
વિજ્ઞાનનિર્ગતમલાઃ સુપવિત્રતાયૈ-
વ ન્દે પ્રભું પતિતપાવનનામધેયમ્ ॥ ૧૧॥

સન્નામકીર્તનનિરન્તરલબ્ધિભાત્રાત્
ગાત્રાદ્દ્રુતં કલુષિણાં સકલાન્યઘાનિ ।
દન્દહ્યમાનતનુભિઃ પરિનિસ્સરન્તિ
વન્દે પ્રભું પતિતપાવનનામધેયન્ ॥ ૧૨॥

યન્નામ મઙ્ગલમમઙ્ગલભઙ્ગકાર-
મુચ્ચારણેન ખલુ પાતકિનાં મુખૈશ્ચ ।
સદ્યઃ પુનાતિ શબરાન્યવનાનધર્માન્
વન્દે પ્રભું પતિતપાવનનામધેયમ્ ॥ ૧૩॥

યસ્યૈકવારમમલં સ્મરણં હિ પુંસાં

સદ્યઃ ક્ષિણોતિ સકલં દુરિતં ચ દુઃખમ્ ।
યઃ સ્વં કરોતિ નયતિ પ્રણતં સ્વધામ
વન્દે પ્રભું પતિતપાવનનામધેયમ્ ॥ ૧૪॥

યજ્જન્મકોટિસુકૃતેન યદા કદાપિ
તિર્યઙ્નૃદેવગણ સન્તતિભૂતિ ભાજઃ ।
ત્વત્પાદસેવનમભૂત્ સ પુમાન્ વિમુક્તો
વન્દે પ્રભું પતિતપાવનનામધેયમ્ ॥ ૧૫॥

યદ્વર્ષમાસદિનયામમુહૂર્તમાત્રે
યૈઃ કૈઃ પ્રયત્નવિધિભિસ્તવ પૂજનં સ્યાત્ ।
સર્વં બભૂવ સુકૃતં પુરુષસ્ય તસ્ય
વન્દે પ્રભું પતિતપાવનનામધેયમ્ ॥ ૧૬॥

ધન્યઃ પુમાન્ ધરણિધર્મધરો ધ્રુવોઽસૌ
ત્વાં શર્મદં નમતિ યઃ શિરસૈકદાપિ ।
પારં પ્રયાતિ દુરવાપજગન્નદીશાત્
વન્દે પ્રભું પતિતપાવનનામધેયમ્ ॥ ૧૭॥

સાઙ્કેત્યહેલનવિમન્યુગતે ચ હાસ્યે
દુઃખાદ્યનન્તસમયે પતિતોઽપિ યસ્ત્વમ્ ।
દાસસ્તવેતિ વદતે ત્વભયં દદાસિ
વદે પ્રભું પતિતપાવનનામધેયમ્ ॥ ૧૮॥

બ્રહ્મેન્દ્રશમ્ભુસનકાદિસુરર્ષયો યં
ન પ્રાપ્નુવન્તિ તપસા નિયમાદિયોગૈઃ ।
સખ્યં વિધાય પુરુષો રમતે હિ તેન
વન્દે પ્રભું પતિતપાવનનામધેયમ્ ॥ ૧૯॥

આત્માર્પણાં હિ કુરુતે પુરુષસ્તુ યસ્તે
સ્વાત્માર્પણં ત્વમપિ દેન કરોષિ તસ્મૈ ।
શ્રેષ્ઠં તુ તં ત્વમનુગચ્છસિ સર્વદૈવ
વન્દે પ્રભું પતિતપાવનનામધેયમ્ ॥ ૨૦॥

સ્ત્રૈણો ધનાન્ધમદિરાવશસમ્પ્રમત્તઃ
પાપી ત્વજામિલશઠઃ કથનાત્તુ યસ્ય ।
નામ્નો જગામ પદવીં મુનિભિર્દુરાપાં

वन्दे प्रभुं पतितपावननामधेयम् ॥ २१॥

વિપ્રામિષં ત્વયિ સમર્પિતવાન્ પરેણ
પ્રેમ્ણા પિશાચકુલજઃ શ્રુતિબદ્ધઘણ્ટઃ ।
આલિઙ્ગ્ય તં નિજજનં કૃતવાન્ સુદોર્ભ્યામ્ ।
વન્દે પ્રભું પતિતપાવનનામધેયમ્ ॥ ૨૨॥

દીનોઽતિજીર્ણવસનઃ ક્ષુધયા કૃશોઽપિ
સન્દત્તતણ્ડુલ ઉદારમતિઃ સુદામા ।
ઉત્પાપવિસ્મૃતરમઃ પરિષસ્વજે યો
વન્દે પ્રભું પતિતપાવનનામધેયમ્ ॥ ૨૩॥

ભોજેન્દ્રદાસ્યનિરતા મલિનાતિનીચા
કુબ્જા તુ યા મધુપુરે પથિ તાં વિલોક્ય ।
ગત્વા ગૃહં કમલયા સદૃશીં વ્યધાદ્યઃ
વન્દે પ્રભું પતિતપાવનનામધેયમ્ ॥ ૨૪॥

જાત્યા તુ વાયકવરં હતધર્મલેશં
ગત્વા તદીયભવને કૃતવાન્ સકમ્પઃ ।
વસ્ત્રાણિ તદ્વિરચિતાનિ દધાર દેહે
વન્દે પ્રભું પતિતતપાવનનામધેયમ્ ॥ ૨૫॥

નીચો નિષાદકુલજો જલજીવભોક્તા
જગ્રાહ તત્કરસમર્પિતકન્દમૂલમ્ ।
કૃત્વા સખાયમતુલં પરિષસ્વજે યો
વન્દે પ્રભું પતિતપાવનનામધેયમ્ ॥ ૨૬॥

માંસાદકં વનચરં દુરિતૌઘયુક્તં
ગૃધ્રં જટાયુષમલં પરિરભ્ય દોર્ભ્યામ્ ।
તસ્મૈ દદૌ પરગતિં પતિદુર્લભાં યો
વન્દે પ્રભું પતિતપાવનનામધેયમ્ ॥ ૨૭॥

વિજ્ઞાનભક્તિવિરતીષ્ટસુધર્મહીના
નીચા મહાવનચરી શબરી હિ તસ્યૈ ।
ભુક્ત્વા તદર્પિતફલં પ્રદદૌ ગતિં યો
વન્દે પ્રભું પતિતપાવનનામધેયમ્ ॥ ૨૮॥

સ્વપ્નેઽપિ દર્શનમમઙ્ગલદં વદન્તિ
　　યેષાં બુધાઃ સ્મરણતો હ્યશુભાનિ લોકે ।
તૈર્વાનરૈઃ સહ ચકાર સુમિત્રતાયૈ
　　વન્દે પ્રભું પતિતપાવનનામધેયમ્ ॥ ૨૯॥

દુષ્ટાનુજં રજનિકાચરવંશજાતં
　　પાદાન્તિકે નિપતિતં ભરતેન તુલ્યમ્ ।
ઉત્થાપ્ય તં સ્વભુજતઃ પરિષસ્વજે યો
　　વન્દે પ્રભું પતિતપાવનનામધેયમ્ ॥ ૩૦॥

જાત્યા તુ ગોપકુલજાઃ પરધર્મહીના
　　ગોપાશ્ચ ગોપવનિતાસ્તુલસીવને તૈઃ ।
ચિક્રીડ રાસપરિમણ્ડલમણ્ડિતો યો ।
　　વન્દે પ્રભું પતિતપાવનનામધેયમ્ ॥ ૩૧॥

વાપી મહાવિષધરઃ કિલ કાલિયેન
　　સમ્પ્લુત્ય ભાસ્કરસુતાહ્રદનીરમધ્યે ।
સંસ્કૃત્ય તત્ફણગણેષ્વભયં દદૌ યો
　　વન્દે પ્રભું પતિતપાવનનામધેયમ્ ॥ ૩૨॥

કિં કિં બ્રવીમિ પતિતોદ્ધરણં હિ લોકે
　　યદ્યત્ત્વયા કૃતમનન્તચતુર્મુખેષુ ।
તસ્માત્ ત્વદીયચરણં શરણં ગતોઽહં
　　મામુદ્ધરસ્વ કૃપયા જગદીશકૃત્ય ॥ ૩૩॥

ન ત્વત્સમઃ પતિતપાવનકાર્યકારી
　　નાસ્માદૃશો જગતિ સમ્પતિતોઽવનીશઃ ।
દિષ્ટ્યા કૃતં વિશદમિત્યનવેક્ષ્ય યોગં
　　મામુદ્ધરસ્વ કૃપયા જગદીશકૃત્ય ॥ ૩૪॥

અન્વેષિતં ભુવનમેતદતીવ બુદ્ધ્યા
　　સ્વોદ્ધારકારણકૃતે ભવતો વિના મે ।
દૃષ્ટો ન કોપિ પતિતોદ્ધરણે સમર્થો
　　મામુદ્ધરસ્વ કૃપયા જગદીશકૃત્ય ॥ ૩૫॥

કામસ્ય પાશવલિતં ચપલં મનો મે
　　સઙ્ધાવતીષ્ટવિષયેષુ વદામિ સત્યમ્ ।

પ્રાપ્સ્યામિ કેન વિધિના ગતિમુત્તમાં તે
મામુદ્ધરસ્વ કૃપયા જગદીશકૃત્ય ॥ ૩૬॥

ત્વં સર્વદિવ્યગુણવૃન્દસમન્વિતોઽસિ
તૈઃ સર્વગર્હિતગુણૈર્વલિતસ્તથાહમ્ ।
લજ્જાવનં તવ કરે મમ સર્વથાસ્તિ
મામુદ્ધરસ્વ કૃપયા જગદીશકૃત્ય ॥ ૩૭॥

સૂર્યો યથા સ્વકિરણૈઃ સ્પૃશતીષ્ટનેષ્ટમ્ ।
સંશોષયન્ન હિ કરોતિ કદાપિ ભેદમ્ ।
વિસ્મૃત્ય તદ્વદગુણં મમ નૈજરીત્યા
મામુદ્ધરસ્વ કૃપયા જગદીશકૃત્ય ॥ ૩૮॥

શોચામિ તન્નિજગુણાનવલોક્ય દુષ્ટાન્
પાપં કરોમિ ખલુ યદ્વશગોઽહમદ્ય ।
હૃષ્યામિ તે ગુણગણાનવલોક્ય ભવ્યાન્
મામુદ્ધરસ્વ કૃપયા જગદીશકૃત્ય ॥ ૩૯॥

જ્ઞાની ન યોગનિરતો ન હિ ભક્તિનિષ્ઠો
વૈરાગ્યલેશસહિતો ન ચ ધર્મધારી ।
પ્રાપ્સ્યામ્યહં કથમહો તવ પાદપદ્મં
મામુદ્ધરસ્વ કૃપયા જગદીશકૃત્ય ॥ ૪૦॥

સ્વાભાવિકી ભવતિ દાહનશક્તિરગ્રે-
શ્ચન્દ્રસ્ય શૈત્યમનિશં વહનં ચ વાયોઃ ।
તદ્વત્તવાપિ પતિતોદ્ધરણં હિ નિત્યં
મામુદ્ધરસ્વ કૃપયા જગદીશકૃત્ય ॥ ૪૧॥

વેદે પુરાણકથને શ્રુતવાનહં યત્
નિત્યં તવેડ્ય પતિતોદ્ધરણં હિ લોકે ।
ઇચ્છામ્યહં તદવલોકિતુમાત્મશુદ્ધ્યૈ
મામુદ્ધરસ્વ કૃપયા જગદીશકૃત્ય ॥ ૪૨॥

સમ્યગ્બભૂવ યદહં પતિતાનગણ્ય-
સ્ત્વં સર્વદોદ્ધરસિ તાન્ પતિતાગ્રગણ્યાન્ ।
સંસ્કૃત્ય રીતિમમલાં વિજચિત્તજાતાં
મામુદ્ધરસ્વ કૃપયા જગદીશકૃત્ય ॥ ૪૩॥

તવ દયા ન હિ ચેદવનીતલે
    મમ સમાન્ જગતીતલપામરાન્ ।
અતિપુનીત દયાવશગો હિ કઃ
    પતિતપાવન માધવ પાહિ મામ્ ॥ ૪૪॥

સકલકારણકારણકારણાઃ
    પતિતતારણતારણતારણાઃ ।
નિખિલભાવનભાવનભાવનાઃ
    પતિતપાવન માધવ પાહિ મામ્ ॥ ૪૫॥

વિપુલજીવનજીવનજીવનો
    જનવિલોપનલોપનલોપનઃ ।
વિશદકામદકામદકામદઃ
    પતિતપાવન માધવ પાહિ મામ્ ॥ ૪૬॥

હૃદયહર્ષણહર્ષણહર્ષણો
    મનુજકર્ષણકર્ષણકર્ષણઃ ।
અવનિપોષણપોષણપોષણઃ
    પતિતપાવન માધવ પાહિ મામ્ ॥ ૪૭॥

દુરિતવર્તનવર્તનવર્તનઃ
    શ્રુતિપ્રવર્તનકર્તનકર્તનઃ ।
જગતિ નર્તનનર્તનનર્તનઃ
    પતિતપાવન માધવ પાહિ મામ્ ॥ ૪૮॥

સકલગોકુલગોકુલગોકુલઃ
    સકલગોકુલગોકુલગોકુલઃ ।
સકલગોકુલગોકુલગોકુલઃ
    પતિતપાવન માધવ પાહિ મામ્ ॥ ૪૯॥

નિબિડનીરદસન્નિભમદ્ભુતં
    વિપુલચારુચતુર્ભુજશોભિતમ્ ।
જનદયાપરિપૂર્ણશરીરકં
    તમવલોકિતુમુત્સહતે મનઃ ॥ ૫૦॥

જ્વલિતરત્નવિભાસિતભાસિતં

મકુટમણ્ડિતમસ્તકમિષ્ટદમ્ ।
સુભગકુણ્ડલમણ્ડલગણ્ડકં
તમવલોકિતુમુત્સહતે મનઃ ॥ ૫૧॥

સ્મિતમુખં સરસોરુહલોચનં
રુચિરનાસિકયા પરિરાજિતમ્ ।
અતિવિશાલસુફાલવિશોભિતં
તમવલોકિતુમુત્સહતે મનઃ ॥ ૫૨॥

ઉરસિ હારવિહારમનોહરં
તુલસિકાવનમાલિકયાન્વિતમ્ ।
કલિતકૌસ્તુભકણ્ઠદરોપમં
તમવલોકિતુમુત્સહતે મનઃ ॥ ૫૩॥

કનકસૂત્રનિબદ્ધકટિસ્થલં
વિમલપીતપટેન વિરાજિતમ્ ।
વિલસિતં ભુજબદ્ધશુભાઙ્ગદં
તમવલોકિતુમુત્સહતે મનઃ ॥ ૫૪॥

કટકશોભિતપાણિતટં શુભં
દરગદાસિસુચક્રશરાસનૈઃ ।
અતિવિરાજિતમૂર્તિમનુત્તમં
તમવલોકિતુમુત્સહતે મનઃ ॥ ૫૫॥

કુટિલકુન્તલમણ્ડલમઞ્જુલં
ભ્રુકુટિભાવિતકર્ણમહાશયમ્ ।
હૃદિ સુપાણ્ડરલક્ષણલક્ષિતં
તમવલોકિતુમુત્સહતે મનઃ ॥ ૫૬॥

ભવવિલાસનિરાસવિધાયકં
મુનિગણામલમાનસમાનસમ્ ।
લસિતનૂ પુરયુગ્મપદામ્બુજં
તમવલોકિતુમુત્સહતે મનઃ ॥ ૫૭॥

ચન્દ્રાંશુગૌરેણ સુનીલવાસસા
મદાવિઘૂર્ણારુણદિવ્યચક્ષુષા ।
રામેણ યુક્તં કૃતદાસમુક્તં

શ્રીમજ્જગન્નાથમહં નમામિ ॥ ૫૮॥

જગજ્જનન્યા કરુણાગ્રગણ્યયા
સુભદ્રયા શોભિતદક્ષભાગમ્ ।
પ્રપન્નપાલં પતિતાર્તિહારિણં
શ્રીમજ્જગન્નાથમહં નમામિ ॥ ૫૧॥

દયાવિધાનેન સુદાસકામદં
મહાપ્રસાદેન ભવાપહારિણમ્ ।
વિમુક્તિદં નીલગિરૌ નિવાસિનં
શ્રીમજ્જગન્નાથમહં નમામિ ॥ ૬૦॥

પાપપ્રણાશાય જગજ્જનાનાં
સંરાજતે યોઽબ્ધિતટે દયાલુઃ ।
તમુધ્દરન્તં પતિતાનઘૌઘાત્
શ્રીમજ્જગન્નાથમહં નમામિ ॥ ૬૧॥

રત્નાસનસ્થં પ્રણવસ્વરૂપં
સતાં ગતં દીનદયાનિધાનમ્ ।
પ્રદર્શયન્ સ્વસ્ય વપુર્જનેભ્યઃ
શ્રીમજ્જગન્નાથમહં નમામિ ॥ ૬૨॥

યા જ્ઞાનયોગેન વિરાગભક્ત્યા
ગતિર્ભવત્યબ્દશતૈર્મુનીનામ્ ।
મહાપ્રસાદેન તુ તદ્ગતિપ્રદમ્ ।
શ્રીમજ્જગન્નાથમહં નમામિ ॥ ૬૩॥

યે પાપિનસ્ત્યક્તસમસ્તસત્ક્રિયા
લોકેવ્યવાયે વિષયૈર્વિલિપ્તાઃ ।
મહાપ્રસાદેન પુનાતિ તાન્ યઃ
શ્રીમજ્જગન્નાથમહં નમામિઃ ॥ ૬૪॥

અસ્માદૃશાં પાપવિનિષ્ઠિતાનાં
નાન્યોઽસ્ત્યુપાયસ્તરણે ભવાબ્ધેઃ ।
મહાપ્રસાદં દદતં તદર્થં
શ્રીમજગન્નાથમહં નમામિ ॥ ૬૫॥

યથામ્બરં વૈ ગતિરસ્તિ પક્ષિણાં
    યથા પશૂનાં પૃથિવી ગતિશ્ચ ।
અસ્માદૃશાં પાપનિવિષ્ટચેતસાં
    ગતિસ્ત્વમેવાસિ તથા ન ચાન્યઃ ॥ ૬૬॥

અન્યઃ સમર્થો ભુવિ કોઽપિ નાસ્તિ
    ય ઉદ્ધરેન્માં કૃપયાતિપાપઘ્નમ્ ।
આધારભૂતં તવ પાદપા
    તસ્માજ્જગત્પાવન રક્ષ લજ્જામ્ ॥ ૬૭॥

યો માં તવાસ્મીતિ જનઃ પ્રયાચતે
    તસ્મૈ દદામીત્યભયં વ્રતં સે ।
આધાર એષોઽદ્ય મમાદિનાથ
    વ્રતં સ્વકીયં ન વિહાતુમર્હસિ ॥ ૬૮॥

ત્યક્ત્વા સુધર્માનખિલાન્ જનો યદા-
    હ્યનન્યધર્મા શરણં સમીહતે ।
અહં તદાઘાનિ વિમોચયામિ
    વ્રતં ત્વદીયં શરણં મમેદમ્ ॥ ૬૯॥

શ્રુત્વા પુરાણાનિ વિધાય ધર્માન્
    કરોમિ કિઞ્ચિન્ન હિ તદ્વિધાનમ્ ।
લજ્જાવિહીનેઽપિ પુરઃ સ્થિતે મયિ
    પ્ર સીદ નીલાચલનાથ દીને ॥ ૭૦॥

પ્રારબ્ધદોષાદ્યદભૂદભૂત્ત-
    ચ્છોચામિ કિઞ્ચિન્ન હિ તસ્ય દુઃખમ્ ।
શોચામિ યત્વચ્છરણાગતં માં
    પ્રવાધતે પાપપરાભવોઽલમ્ ॥ ૭૧॥

ન ચિત્તવૃત્તિસ્થિરતા પ્રયાતિ
    ન પાપકર્મસ્વપિ મેઽસ્તિ તોષઃ ।
કેન પ્રયત્નેન ગતિં ચ લપ્સ્યે
    લજ્જા ત્વિદાની તવ પાણિપદ્મે ॥ ૭૨॥

શાસ્ત્રેષુ વેદેષુ પુરાણકલ્પે
    શ્રુતો મયા ત્વં પતિતોદ્ધરઃ સદા ।

અતોઽતિપાપે પતિતપ્રધાને
    દયાવિધાને ત્વમસિ ક્ષમોઽદ્ય ॥ ૭૩॥

ગૃધ્રે ગુહે વૈ નૃગભૂમિદેવે
    ગજે પિશાચેઽપિ કૃતા દયા યા ।
કારાગૃહે રાજસુ માગધસ્ય
    કુરુષ્વ દીને મયિ તાં દયાં પ્રભો ॥ ૭૪॥

યદ્યપ્યહં પાપસમૂહકારી
    સ્થાતું હિ નાર્હોઽસ્મિ પુરસ્તથાપિ ।
ત્વં નામ સંસ્મૃત્ય નિજં જગત્પતે
    મામુદ્ધર પ્રેષ્ઠમકિઞ્ચનાનામ્ ॥ ૭૫॥

ક્વ યામ્યહં કે નિતરાં સ્મરાસિ
    નાન્યોઽસ્તિ લોકે પ્રભુદીનનાથઃ ।
ઋતે ભવન્તં જગદેકનાથ-
    મુપાયહીનઃ શરણાગતોઽહમ્ ॥ ૭૬॥

પાઞ્ચાલરાજસ્ય કુમારિકાયા
    લજ્જા ત્વદીયસ્મરણેન રક્ષિતા ।
તથૈવ નીલાદ્રિપતેઽનુકમ્પયા
    લજ્જાં મદીયામવ વાસુદેવ ॥ ૭૭॥

ત્વત્પ્રેરિતૌ મત્પિતરૌ પ્રચક્રતુ-
    ર્મન્નામ યદ્ભાગવતપ્રસાદમ્ ।
સ્વસમ્પ્રદાયે કૃતવાન્ યતસ્ત્વં
    સત્ શ્રીજગન્નાથ ભવત્કરામ્બુજે ॥ ૭૮॥

હાસ્યં ન લોકે મમ કિઞ્ચિદસ્તિ
    હાસ્યાસ્પદં યત્સ્વયમેવ જાતઃ ।
કિન્તુ ત્વદગ્રે શરણાગતાનાં
    હાસ્યં ચ લોકેષુ મહાનનર્થઃ ॥ ૭૯॥

શોચામિ નાહં નરકપ્રપાતં
    શોચામિ નાહં પતિતોઽભવં યત્ ।
શોચામ્યહં ત્વચ્છરણાગતસ્ય
    નેયં દશા નાથ તવાનુરૂપા ॥ ૮૦॥

ય આદ્યોઽન્તોઽનાદિઃ સકલગુણવૃન્દૈકસદનં
    સ્વશક્ત્યેદં વિશ્વં સૃજતિ સુતરાં પાતિ હરતે ।
જગત્ક્રીડાકારી નિજજનદયાદાનનિરતો
    જગન્નાથસ્વામી નયનપથગામી ભવતુ મે ॥ ૮૧॥

કદમ્બચ્છાયાયાં ધૃતવિપિનપુષ્પાભરણક-
    સ્ત્રિભઙ્ગાકારો યઃ કૃતમધુરવંશીકલરવઃ ।
કટાક્ષાક્ષેપેણ બ્રજપુરવધૂનાં હિ સુખદો
    જગન્નાથસ્વામી નયનપથગામી ભવતુ મે ॥ ૮૨॥

સદા વૃન્દારણ્યે વરમધુરવંશીધ્વનિરતો
    નિકુઞ્જે ભૃઙ્ગાઢ્યે બહુસુરભિસઞ્ચારણપરઃ ।
સુહૃદ્ભિર્ગોપાલૈસ્સુખિતવદનૈર્યોઽતિશુશુભે
    જગન્નાથસ્વામી નયનપથગામી ભવતુ મે ॥ ૮૩॥

મનોહારી હારી વ્રજવનવિહારી યદુપતિ-
    દ્વિષદ્વારી તારી હૃદિ શિવવિચારી સુમનસામ્ ।
સદા સઞ્ચારી યો દિનપતિકુમારીકલતટે
    જગન્નાથસ્વામી નયનપથગામી ભવતુ મે ॥ ૮૪॥

ભવાન્તર્યામી યો વરવિહગગામી સ્વસુષદઃ
    સતામાત્મારામી કટિકનકદામી વિભુવપુઃ ।
સુધામા શન્ધામા જનસુગતિકામી કરુણયા
    જગ ન્નાથસ્વામી નયનપથગામી ભવતુ મે ॥ ૮૫॥

પ્રવીરૈ રાજન્ત્યાં મદનબલશૈનેયસુભગૈઃ
    સુધર્માયાં સિંહાસનવરગતો યોઽતિશુશુભે ।
ચતુર્બાહુઃ શ્યામો ધનુરસિગદાદ્યાયુધધરો
    જગન્નાથસ્વામી નયનપથગામી ભવતુ મે ॥ ૮૬॥

નિહન્તા કંસં ચ પ્રવલમુરભૌમાદિનિકરા-
    ન્નિયન્તા વિશ્વસ્ય પ્રચુરતરયાસ પાષણ્ડદલનઃ ।
સુયન્તા સઙ્ગોપ્તામરપતિસુતસ્યાત્મવિભવૈ-
    જગન્નાથઃ સ્વામી નયનપથગામી ભવતુ મે ॥ ૮૭॥

સરસ્યમ્બ્વાસ્તીરે યો વરભરતશત્રુઘ્નસહિત-

સ્સુમિત્રાપુત્રેણ પ્રવિલસતિ લીલાતિલલિતઃ ।
સુહદ્ભિસંયુક્તો ધૃતસશરકોદણ્ડસુભુજો
જગન્નાથઃ સ્વામી નયનપથગામી ભવતુ મે ॥ ૮૮॥

કદાચિદ્રત્નાઢ્યે હિમગિરિસુશૃઙ્ગે યમગૃહે
સખીભિઃ સંયુક્તો જનકતનયાભ્રાજિતભુજઃ ।
સુપુષ્પાલઙ્કારૈરતિલસિતસર્વાઙ્ગસુભગો
જગન્નાથઃ સ્વામી નયનપથગામી ભવતુ મે ॥ ૮૯॥

વિજેતા શત્રૂણાં નિશિચરકૃલોદ્ભૂતજનુષા-
મૃષીણાં સઙ્ગોપ્તોદધિવિપુલસેતો રચયિતા ।
પ્રદાતા ગૃધ્રસ્યાદ્ભુતગતિમગુર્યાં ન મુનયો
જગન્નાથઃ સ્વામી નયનપથગામી ભવતુ મે ॥ ૯૦॥

દયાપારાવારો વરગુણગણસ્યૈકનિલયો
યશો ભાસં શુદ્ધિં યદશુચિજનોઽપિ પ્રલભતે ।
મરાલો યત્પાદઃ શિવમનસિ સન્માનસવરે
જગન્નાથઃ સ્વામી નયનપથગામી ભવતુ મે ॥ ૯૧॥

સૃજાશક્ત્યા સૃષ્ટિં પુનરપિ ચ હર્ત્રૈવ હરણં
સુપાલિન્યા પાલં સ્વશરણશરણ્યઃ પ્રકુરુતે ।
ય ઈદૃગ્ગૌરીશઃ પ્રભુરપિ ચ તસ્યાપિ સુખદો
જગન્નાથઃ સ્વામી નયનપથગામી ભવતુ મે ॥ ૯૨॥

સતાં ધર્માચાર્યો મુનિજનસુવિજ્ઞાનદપરો
મહાન્ યોગાચાર્યઃ પ્રકૃતિપતિરત્યદ્ભુતકલઃ ।
મહાદેવસ્તસ્યામલમનસિ યચ્ચારુચરણો
જગન્નાથઃ સ્વામી નયનપથગામી ભવતુ મે ॥ ૧૩॥

હરેર્નાથો હારી હરિયતિપતિઃ સંહરિમુખો
ન્નિર્દીન્નિર્દીન્નિર્હરિવહસુશિષ્યચ્છલકરઃ ।
હરેર્મિત્રં ચિત્રં હરિકટિરનાદિર્હરિગતિ-
ર્જગન્નાથઃ સ્વામી નયનપથગમી ભવતુ મે ॥ ૯૪॥

શરન્મેઘાકારો હલમુસલસન્ધારણપરો
ધરાધારોદ્ધારો જનકલિવિકારાપહરણઃ ।
ય ઈદૃક્છ્રીરામઃ શુભગતિકરસ્તેન સહિતો

જગન્નાથઃ સ્વામી નયનપથગામી ભવતુ મે ॥ ૯૫॥

અહં પાપાસક્તઃ પ્રભુરપિ મહાપાપદહનો-
ઽસ્ત્યહં હીનાચારઃ પ્રભુરપિ સમુદ્ધારણકરઃ ।
વિચિન્ત્યેમં યોગં નિજચરણગાલ્પસ્ય કૃપયા
જગન્નાથઃ સ્વામી નયનપથગામી ભવતુ મે ॥ ૯૬॥

અસૌ યઃ કે સદા શેતે કેશેશઃ શઙ્કરઃ સતામ્ ।
નાદિવેદાર્ણનામા માં કુમેશો વિશ્વગોઽવતુ ॥ ૯૭॥

તવ ચરણસરોજં સિદ્ધદેવેન્દ્રવન્દ્યં
નિખિલપતિતતારં જ્ઞાનવિજ્ઞાનકારમ્ ।
નિજજનપરિપાલં કલ્મષાણાં હિ કાલં
મુનિમનસિ મરાલં વિશ્વપાલં નમામિ ॥ ૯૮॥

જયતુ જલધિવાસી નીલશૈલેન્દ્રભાસી
નિજજનરિપુનાશી સત્યવિશ્વપ્રકાશી ।
વ્રજવિપિનવિલાસી સર્વદા મન્દહાસી
નરનરકનિરાસી દિવ્યસૌન્દર્યરાશિઃ ॥ ૯૯॥

મયિ વિરતિવિલીને સર્વ દુઃખૈકતાને
ખલસમલકુલીને સર્વદા પાપપીને ।
મદમદનવિલીને ત્વં દયાં સંવિધત્સ્વ
નિજપદજલનીને પામરેઽસ્મિન્નવીને ॥ ૧૦૦॥

નીલાચલનિવાસાય દિવ્યૈશ્વર્યવિભાસિને ।
બલભદ્રસુભદ્રાભ્યા જગન્નાથાય તે નમઃ ॥ ૧૦૧॥

હે નાથ હે રમાનાથ પ્રણતાર્તિવિનાશન ।
જગન્નાથ દયાસિન્ધો રઘુરાજે દયાં કુરુ ॥ ૧૦૨॥

નારાયણ સુરશ્રેષ્ઠ દીનોદ્ધારપરાયણ ।
જગન્નાથ દયાસિન્ધો રઘુરાજે દયાં કુરુ ॥ ૧૦૩॥

જગદ્ધાતર્જગત્રાતર્જગન્માતર્જગત્પિતઃ ।
જગદીશ દયાસિન્ધો રઘુરાજે દયાં કુરુ ॥ ૧૦૪॥

જગદાધાર ધીરેન્દ્ર ધારાધર્મધુરન્ધર ।
જગન્નાથ દયાસિન્ધો રઘુરાજે દયાં કુરુ ॥ ૧૦૫॥

જનાર્દન જગદ્વાસ જગદ્વન્ધ જગદ્ગુર ।
જગન્નાથ દયાસિન્ધો રઘુરાજે દયાં કુરુ ॥ ૧૦૬॥

ત્વદન્યો ન ગતિર્મેઽદ્ય ત્વામહં શરણં ગતઃ ।
જગન્નાથ દયાસિન્ધો રઘુરાજે દયાં કુરુ ॥ ૧૦૭॥

ત્વદાધારસ્ત્વદ્બલોઽહં ત્વમેવ શરણં મમ ।
જગન્નાથ દયાસિન્ધો રઘુરાજે દયાં કુરુ ॥ ૧૦૮॥

જગદીશસ્ય શતકં રઘુરાજકૃતં શુભમ્ ।
પઠતાં શ◌ૃણ્વતાં શશ્વજ્જગદીશઃ પ્રસીદતુ ॥ ૧૦૯॥

રામેન્દુખણ્ડવિધુભિર્મિતેઽબ્દે તૈર્થ્યષ્ય ઉત્તમે ।
શનાવમાયાં શતકં જગદીશસ્ય નિર્મિતમ્ ॥ ૧૧૦॥

ઇતિ શ્રીસિદ્ધિ શ્રીબાન્ધવેશમહારાજાધિરાજશ્રીમહારાજશ્રીરાજાવહાદુદ
શ્રીકૃષ્ણચન્દ્રકૃપાપાત્રાધિકારીં શ્રીરઘુરાજસિંહજાદેવવિરચિતં
શ્રીજગદીશશતકં સમ્પૂર્ણમ્ ।

Proofread by Rajesh Thyagarajan

---

*Shri Jagadisha Shatakam*

pdf was typeset on June 29, 2023

Please send corrections to *sanskrit@cheerful.com*